श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ चतुश्चत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुश्चत्वारिंशः सर्गः ॥

**भगीरथं प्रशस्य ब्रह्मणा तस्मै गङ्गाजलेन पितृतर्पणं कर्तुमनुज्ञादानं तत्सर्वं कृत्वा भगीरथस्य स्वपुरे गमनं गङ्गावतरणोपाख्यानस्य महिमा च**

स गत्वा सागरं राजा गङ्गयानुगतस्तदा।
प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः॥ **1.44.1** ॥

भस्मन्यथाप्लते राम गङ्गायाः सलिलेन वै।
सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत्॥ **1.44.2** ॥

तारिता नरशार्दूल दिवं याताश्च देववत्।
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः॥ **1.44.3** ॥

सागरस्य जलं लोके यावत्स्थास्यति पार्थिव।
सगरस्यात्मजाः सर्वे दिवि स्थास्यन्ति देववत्॥ **1.44.4** ॥

इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति।
त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता॥ **1.44.5** ॥

गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता॥ **1.44.6** ॥

पितामहानां सर्वेषां त्वमत्र मनुजाधिप।
कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय॥ **1.44.7** ॥

पूर्वकेण हि ते राजंस्तेनातियशसा तदा।
धर्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः॥ **1.44.8** ॥

तथैवांशुमता वत्स लोकेऽप्रतिमतेजसा।
गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता॥ **1.44.9** ॥

राजर्षिणा गुणवता महर्षिसमतेजसा।
मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च॥ **1.44.10** ॥

दिलीपेन महाभाग तव पित्रातितेजसा।
पुनर्न शकिता नेतुं गङ्गां प्रार्थयतानघ॥ **1.44.11** ॥

सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ।
प्राप्तोऽसि परमं लोके यशः परमसम्मतम्॥ **1.44.12** ॥

तच्च गङ्गावतरणं त्वया कृतमरिन्दम।
अनेन च भवान् प्राप्तो धर्मस्यायतनं महत्॥ **1.44.13** ॥

प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते।
सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो भव॥ **1.44.14** ॥

पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम्।
स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप॥ **1.44.15** ॥

इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः।
यथागतं तथागच्छद् देवलोकं महायशाः॥ **1.44.16** ॥

भगीरथस्तु राजर्षिः कृत्वा सलिलमुत्तमम्।
यथाक्रमं यथान्यायं सागराणां महायशाः॥ **1.44.17** ॥

कृतोदकः शुची राजा स्वपुरं प्रविवेश ह।
समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह॥ **1.44.18** ॥

प्रमुमोद च लोकस्तं नृपमासाद्य राघव।
नष्टशोकः समृद्धार्थो बभूव विगतज्वरः॥ **1.44.19** ॥

एष ते राम गङ्गाया विस्तरोऽभिहितो मया।
स्वस्ति प्राप्नुहि भद्रं ते सन्ध्याकालोऽतिवर्तते॥ **1.44.20** ॥

धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमथापि च।
यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च॥ **1.44.21** ॥

प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च।
इदमाख्यानमायुष्यं गङ्गावतरणं शुभम्॥ **1.44.22** ॥

यः शृणोति च काकुत्स्थ सर्वान् कामानवाप्नुयात्।
सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते॥ **1.44.23** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुश्चत्वारिंशः सर्गः॥